श्री अष्टभुजाष्टकं

श्री अष्टभुजाष्टकं

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी |
वेदांताचार्यवर्यो मे सन्निधत्तां सदा हृदि | |

गजेंद्ररक्षात्वरितं भवंतं
ग्राहैरिवाहं विषयैर्विकृष्टः |
अपारविज्ञानदयानुभाव-
-माप्तं सतामष्टभुजं प्रपद्ये | | 1 | |

त्वदेकशेषोऽहमनात्मतंत्र-
-स्त्वत्पादलिप्सां दिशता त्वयैव |
असत्समोऽप्यष्टभुजास्पदेश
सत्तामिदानीमुपलंभितोऽस्मि | | 2 | |

स्वरूपरूपास्त्रविभूषणाद्यैः
परत्वचिंतां त्वयि दुर्निवारां |
भोगे मृदूपक्रमतामभीप्सन्
शीलादिभिर्वारयसीव पुंसां | | 3 | |

शक्तिं शरण्यांतरशब्दभाजां
सारं च संतोल्य फलांतराणां |
त्वद्दास्यहेतोस्त्वयि निर्विशंकं
न्यस्तात्मनां नाथ बिभर्षि भारं | | 4 | |

अभीतिहेतोरनुवर्तनीयं
नाथ त्वदन्यं न विभावयामि |
भयं कुतः स्यात् त्वयि सानुकंपे
रक्षा कुतः स्यात् त्वयि जातरोषे | | 5 | |

त्वदेकतंत्रं कमलासहाय
स्वेनैव मां रक्षितुमर्हसि त्वं |
त्वयि प्रवृत्ते मम किं प्रयासै-
-स्त्वय्यप्रवृत्ते मम किं प्रयासैः || 6 ||

समाधिभंगेष्वपि संपतत्सु
शरण्यभूते त्वयि बद्धकक्ष्ये |
अपत्रपे सोढुमकिंचनोऽहं
दूराधिरोहं पतनं च नाथ || 7 ||

प्राप्ताभिलाषं त्वदनुग्रहान्मां
पद्मानिषेव्ये तव पादपद्मे |
आदेहपातादपराधदूर-
-मात्मांतकैंकर्यरसं विधेयाः || 8 ||

प्रपन्न जनपाथेयं प्रपित्सूनां रसायनं |
श्रेयसे जगतामेतच्छ्रीमदष्टभुजाष्टकं || 9 ||

शरणागतसंत्राणत्वराद्विगुणबाहुना |
हरिणा वेंकटेशीया स्तुतिः स्वीक्रियतामियं || 10 ||

कवितार्किकसिंहाय कळ्याणगुणशालिने |
श्रीमते वेंकटेशाय वेदांतगुरवे नमः ||

इति श्री वेदांतदेशिक कृतं श्री अष्टभुजाष्टकं |